श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश्वर आशीर्वचनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश्वर आशीर्वचनम् ॥

एष वै सोमराजा यो यजते।
प्राग्दिशि तिष्ठत्यादधति।
प्राचीदिग्भागे इन्द्रो देवता।
इन्द्रप्रसादात्।
राज्याभिवर्धनमश्नुते।
तेन प्राचीं दिशं जयति।
तं दक्षिणा परिवहन्ति।
दक्षिणदिग्भागे धर्मराजो देवता।
धर्मराजप्रसादात्।
आयुष्याभिवर्धनमश्नुते।
तेन दक्षिणां दिशं जयति।
तं प्रत्यञ्चमावर्तयन्ति।
प्रतीची दिग्भागे वरुणो देवता।
वरुणप्रसादात्।
पुत्रपौत्राभिवर्धनमश्नुते।
तेन प्रतीचीं दिशं जयति।
तमुदीची तिष्ठतमुपावहरन्ति।
उदीची दिग्भागे कुबेरो देवता।
कुबेरप्रसादात्।
धनधान्याभिवर्धनमश्नुते।
तेनोदीचीं दिशं जयति।

सर्वदिग्भागे ब्राह्मणो देवता।
ब्राह्मण प्रसादात्।
सकलसाम्राज्याभिवर्धनमश्नुते।
तेन सर्वान् दिशं जयति।
सोमेन राज्ञा सर्वादिशो जयति य एवं वेद।
तासामेषा पराभवति तस्यैषा
पराभवति तस्योत्तरा भूयसे शुभवचनाय॥

वृषशैलाधिप एव दैवतं नः।
वृषभाद्रीश्वर एव दैवतं नः।
फणिशैलाधिप एव दैवतं नः।
भगवान् वेङ्कट एव दैवतं नः।
श्री श्रीनिवासः पर दैवतं नः।
श्री श्रीनिवासः परमं धनं नः।
श्री श्रीनिवासः कुलदैवतं नः।
श्री श्रीनिवासः परमागतिर्नः।

वक्त्राब्जे भाग्यलक्ष्मीः
करतलकमले सर्वदा दानलक्ष्मीः
दोर्दण्डे वीरलक्ष्मीः
हृदयसरसिजे भूतकारुण्यलक्ष्मीः।
खड्गाग्रे शौर्यलक्ष्मीः
निखिलगुणगणाडम्बरे कीर्तिलक्ष्मीः
सर्वाङ्गे सौम्यलक्ष्मीः
त्वयि तु विजयतां सर्वदा राज्यलक्ष्मीः॥

श्रीवर्चस्वमायुष्यमारोग्यमावीधाच्छोभमानं महीयते।
धान्यंधनंपशुंबहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्री वेङ्कटनिवासाय श्रीनिवासाय मङ्गळम्॥

॥ इति श्रीवेङ्कटेश्वर आशीर्वचनं समाप्तम्॥